कुत्रचिद्व्याधयः कार्य्यकारणयोरभेदोपचारात् आगन्तुजा अभिघाताद्यनेककारणयोगादनेके भवन्ति। तथाप्यागन्तुजत्वेन साम्यादागन्तुजोऽप्यत्रैक एव भणितः। नन्वागन्तुजेऽपि ज्वरे वातादिलक्षणदर्शनादागन्तुजः कथं दोषजाद्भिन्नः उच्यते, उत्तरकालं दोषोत्पत्तेः। तथा च चरके "आगन्तुजो हि व्यथापूर्वं जायते पश्चाद्भिन्नै र्दोषैरनुबध्यते" इति। अथ ज्वरस्य विप्रकृष्टकारणकथनपूर्विकां सम्प्राप्तिमाह "मिथ्याहारविहाराभ्यां दोषा ह्यामाशयाश्रयाः। बहिर्निरस्य कोष्टाग्निं ज्वरदाः स्यूरसानुगाः"। मिथ्याहारविहाराभ्यां अनुचिताहारचेष्टाभ्यां हेतुभूताभ्यां दोषाः वातपित्तकफाः आमाशयाश्रयाः आमाशयं गता रसानुगाः रसदूषकाः बहिर्निरस्य कोष्टाग्निं कोष्टगताग्नेरूष्माणम् न तु समस्तमग्निं तदा दोषपाकासम्भवः स्यात्। बहिः प्रक्षिप्य ज्वरदाः स्युर्ज्वरकारिणो भवेयुरित्यर्थः। अथ ज्वरस्य सामान्यं विशिष्टञ्च पूर्वरूपमाह "श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवः। इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु। जृम्भाऽङ्गमर्दो गुरुता रोमहर्षोऽरुचिस्तमः। अप्रहर्षश्च शीतञ्च भवन्त्युत्पत्स्यति ज्वरे। सामान्यतो विशेषात्तु जृम्भात्यर्थं समीरणात्। पित्तान्नयनयोर्दाहः कफान्नान्नाभिनन्दनम्।" श्रमो व्यापारं विनैव, अरतिरस्वस्थचित्तत्वम् विवर्णत्वं म्लानगात्रता। वैरस्यं मुखस्याऽप्रकृतरसता। नयनप्लवः नयनयोरश्रुपूर्णत्वम्। शीतवातातपादिषु मुहुरिच्छाद्वेषौ। आदिशब्दाज्ज्वलने जले च। यत उक्तं चरकेण "ज्वलनातपवातेषु भक्तिद्वेषावनिश्चिताविति"। शयनादिष्वित्यन्ये। अङ्गमर्दोऽङ्गमोटनम्। गुरुता गात्रस्य। रोमहर्षः रोमाञ्चता। अरुचिर्भोजने, तमः तमोमग्नस्येव ज्ञानम्। अप्रहर्षः हर्षाभावः। शीतं लगति चकाराद्बलहानिः उपदेशद्वेषादयोऽपि भवन्ति। तृतीयश्लोकस्थम् सामान्यत इति पूर्वश्लोकाभ्यां सम्बन्धनीयम्। तेन सामान्यतो ज्वर उत्पत्स्यति भविष्यति श्रमादयः पूर्वमेव भवन्तीत्यर्थः। उत्पत्स्यतीत्यात्मनेपदिनोऽपि तङभाव आर्षत्वात्। विशेषात् उच्यते। समीरणात् ज्वरे उत्पत्स्यति अतिशयेन जृम्भा भवति। पित्तज्वरे उत्पत्स्यति अत्यर्थंनयनयोर्दाहो भवति। कफज्वरे उत्पत्स्यति अत्यर्थेन नान्नाभिनन्दनम् अन्नाकाङ्क्षा न भवति। जृम्भादयो भवन्ति यतः सामान्यधर्माक्रान्तो विशिष्टोधर्मोभवति। द्वन्द्वजपूर्वरूपमाह, "रूपैरन्यतराभ्यां तु संसृष्टैर्द्वन्द्वजं विदुः। अन्यतराभ्यां जृम्भानेत्रदाहाभ्याम्। जृम्भान्नारुचिभ्यां नेत्रदाहान्नारुचिभ्यां वा संसृष्टैरूपैः श्रमादिभिः द्वन्द्वजं द्विदोषजं पूर्वरूपं विदुः। त्रिदोषजपूर्वरूपमाह, "सर्वलिङ्गसमावायः सर्वदोषप्रकोपजे। सर्वरूपजे सर्वरूपे सर्वलिङ्गसमवायः। अतिशयितजृम्भानेत्रदाहान्नारुचिसहितानां श्रमादीनां समवायो भवति। अथ ज्वरस्य सामान्यलक्षणमाह, "स्वेदावरोधः सन्तापः सर्वाङ्गग्रहणं तथा। युगपद्यत्र रोगे तु स ज्वरो व्यपदिश्यते। ताप इति वक्तव्ये सन्तापाभिधानं देहेन्द्रियमनसां सन्तापबोधनार्थम्। यत उक्तं चरकेण ज्वरविशेषणम्। "देहेन्द्रियमनस्तापीति"। तत्र देहसन्तापो देहेन्द्रियोष्णता। इन्द्रियसन्ताप इन्द्रियवैकल्यम्। यत उक्तम् "इन्द्रियाणां तु वैकल्यं यत्र सन्तापलक्षणम्। वैचित्त्यमरतिर्ग्लानिर्म्मनः-सन्तापलक्षणम् इति"। सर्वाङ्गग्रहणम् सर्वेषामङ्गानां वेदनया ग्रहणं सर्वाण्यङ्गानि स्तम्भनगृहीतानीव वा भवन्ति। युगपदिति। मिलितमेतल्लक्षणम्। प्रत्येकस्य व्यभिचारात्। यथा स्वेदावरोधः कुष्ठपूर्वरूपे। तथा सन्तापो दाहव्याधौ। तथा सर्वाङ्गग्रहणं सर्वाङ्गरोगाख्यवातव्याधौ। प्रस्वेदानिर्गमनपक्षे कारणमाह। "रुणद्धि चाप्यपां धातुं यस्मात्तस्माज्ज्वरातुरः। भवत्यत्युष्णगात्रश्च स्विद्यते न च सर्वशः। तस्माज्ज्वरोऽत्र भवति सर्वशः स्विद्यते न च"।

सुश्रुते उत्तरतन्त्रे च तत्र विशेष उक्तो यथा

"ऋते देवमनुष्येभ्यो नान्यो विषहते तु तम्। कर्मणा लभते यस्माद्देवत्वं मानुषादपि। पुनस्चैव च्युतः स्वर्गान्मानुष्यमनुवर्त्तते। तस्मात्ते देवभागेन सहन्ते मानुषा ज्वरम्। शेषाः सर्वे विपद्यन्ते तैर्य्यग्योना ज्वरार्दिताः। स्वेदावरोधः सन्तापः सर्वाङ्गग्रहणं तथा। विकारा युगपद्यस्मिन् ज्वरः स परिकीर्तितः। दोषैः पृथक् समस्तैश्च द्वन्द्वैरागन्तुरेव च। अनेककारणोत्पन्नः स्मृतस्त्वष्टविधो ज्वरः। दोषाः प्रकुपिताः स्वेषु कालेषु स्वैः प्रकोपनैः। व्याप्य देहमशेषेण ज्वरमापादयन्ति हि। दुष्टाः स्वहेतुभिर्दोषाः प्राप्यामाशयमूष्मणा। सहिता रसमागत्य रसस्वेदप्रवाहिणाम्। स्रोतसां मार्गमावृत्य मन्दीकृत्य हुताशनम्। निरस्य वहिरूष्माणं पक्तिस्थानाच्च केवलम्। शरीरं समभिव्याप्य स्वकालेषु ज्वरागमम्। जनयन्त्यथ वृद्धिञ्च स्ववर्णञ्च त्वगादिषु। मिथ्यातियुक्तैरपि च